श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये एकोनपञ्चाशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये एकोनपञ्चाशं दशकम् ॥

## वृन्दावनगमनवर्णनम्

भवत्प्रभावाविदुरा हि गोपा -
    स्तरुप्रपातादिकमत्र गोष्ठे।
अहेतुमुत्पातगणं विशङ्क्य
    प्रयातुमन्यत्र मनो वितेनुः ॥ **49.1** ॥

तत्रोपनन्दाभिधगोपवर्यो
    जगौ भवत्प्रेरणयैव नूनम्।
इतः प्रतीच्यां विपिनं मनोज्ञं
    वृन्दावनं नाम विराजतीति ॥ **49.2** ॥

बृहद्वनं तत् खलु नन्दमुख्या
    विधाय गौष्ठीनमथ क्षणेन।
त्वदन्वितत्वज्जननीनिविष्ट -
    गरिष्ठयानानुगता विचेलुः ॥ **49.3** ॥

अनोमनोज्ञध्वनिधेनुपाली -
    खुरप्रणादान्तरतो वधूभिः।
भवद्विनोदालपिताक्षराणि
    प्रपीय नाज्ञायत मार्गदैर्घ्यम् ॥ **49.4** ॥

निरीक्ष्य वृन्दावनमीश नन्द -
    त्प्रसूनकुन्दप्रमुखद्रुमौघम्।

अमोदथाः शाद्वलसान्द्रलक्ष्म्या
    हरिन्मणीकुट्टिमपुष्टशोभम् ॥ **49.5** ॥

नवाकनिर्व्यूढनिवासभेदे -
    ष्वशेषगोपेषु सुखासितेषु।
वनश्रियं गोपकिशोरपाली -
    विमिश्रितः पर्यगलोकथास्त्वम् ॥ **49.6** ॥

अरालमार्गागतनिर्मलापां
    मरालकूजाकृतनर्मलापाम्।
निरन्तरस्मेरसरोजवक्त्रां
    कलिन्दकन्यां समलोकयस्त्वम् ॥ **49.7** ॥

मयूरकेकाशतलोभनीयं
    मयूखमालाशबलं मणीनाम्।
विरिञ्चलोकस्पृशमुच्चशृङ्गै -
    र्गिरिं च गोवर्धनमैक्षथास्त्वम् ॥ **49.8** ॥

समं ततो गोपकुमारकैस्त्वं
    समन्ततो यत्र वनान्तमागाः।
ततस्ततस्तां कुटिलामपश्यः
    कलिन्दजां रागवतीमिवैकाम् ॥ **49.9** ॥

तथाविधेऽस्मिन् विपिने पशव्ये
    समुत्सुको वत्सगणप्रचारे।
चरन् सरामोऽथ कुमारकैस्त्वं
    समीरगेहाधिप पाहि रोगात् ॥ **49.10** ॥

॥ इति श्रीमन्नारायणीये एकोनपञ्चाशं दशकं समाप्तम् ॥